यस्याःसा पद्मनालाकारत्वान्नालोक्तिः। अन्तर्मध्ये अवटोगर्त्तः स्रुचि घृतधारणार्थं यद्वत्तेन रुचिरा सुन्दरा सा अश्वत्थपत्राकृतिः स्यादिति व्याख्या। वायवीये "मेखलां मध्यतः कुर्य्यात् पश्चिमे दक्षिणेऽपि वा। शोभनां मध्यतः किञ्चिन्निम्नामुन्मीलितां शनैरिति" योनिमिति शेषः। त्रैलोक्यसारे "दीर्घा सूर्य्याङ्गुला योनिस्त्र्यंशोना विस्तरेण तु। एकाङ्गुलोच्छ्रिता सा तु प्रविष्टाऽभ्यन्तरे तथा। कुम्भद्वयार्द्धसंयुक्ता साश्वत्थदलवन्मता। अङ्गुष्ठमेखलायुक्ता मध्ये वाज्यधृतिस्तथेति" पञ्चरात्रे "अर्काङ्गुलोच्छ्रितां योनिं विदध्यात्तावदायताम्" तावद्दीर्घाम् एकाङ्गुलोच्छ्रिता इत्यस्य विवरणम् अङ्गुष्ठमेखलायुक्तेत्यत्र अङ्गुलद्वयमुच्छ्रायः कुत्रचिदुक्तः अङ्गुलं परिधिरिति द्वादशाङ्गुलोच्छ्रायः अयं न प्रायोबहुसंमतपक्षः अतोऽस्मदुक्त एकाङ्गुलोच्छ्रायपक्षोबहुसंमतः कार्य्यः। शारदायाम्" "मूलादारभ्य नालं स्याद्योन्या मध्ये सरन्ध्रकमिति" द्वादशाङ्गुलमेखलापक्षे योनिलक्षणमाह "अथार्काङ्गुलपक्षे तु मेखलानान्दशाङ्गुलैः। विस्तृता तिथिभिर्दीर्घाङ्गुलिभिर्योनिरिष्यते" मेखलानां दशाङ्गुलैर्विस्तृता तिथ्यङ्गुलैर्दीर्घा योनिः स्यादिति व्याख्या। प्रयोगसारे "स्थितां प्रतीच्यामायामे सम्यक् पञ्चदशाङ्गुलाम्। द्विपञ्चाङ्गुलविस्तारां षट्चतुर्द्व्यङ्गुलाः क्रमात्। त्रयोदशाङ्गुलोत्सेधां योनिं कुण्डस्य कारयेत्"। केचित् योनिक्षेत्रस्य दीर्घचतुरस्रक्षेत्रस्य यत्फलं तस्य मूलमानीय तावत्समचतुरस्रं संशोध्य योनिकुण्डवद्योनिं साधयेदित्याहुः"। अधिकं कुण्डार्कादौ दृश्यम्।

"रसं पिबेत् कुमारोऽयं त्वत्प्रसादात् महाबलः। बलं नागसहस्रस्य यस्मिन् कुण्डे प्रतिष्ठितम्। यावत् पिबति बालोऽयं तावदस्मै प्रदीयताम्"। "एकोच्छ्वासात्तत कुण्डं पिबति स्म महाबलः। एवमष्टौ स कुण्डानि ह्यपिबत् पाण्डुनन्दनः" भा०आ० १२८अ०। "साधुभिर्गर्हितं कर्म्म चण्डालस्य विधीयते। तस्मात् गोरजसा ध्वस्तमपां कुण्डे निषिञ्चति" भा० आनु० १०१अ०। कण्डते कुलमनेन कुडि—दाहे करणे घञ्। अमृते भर्त्तरि ५जारजाते स्त्रियां टाप्। "परदारेषु जायेते द्वौ सुतौ कुण्डगोलकौ। पत्यौ जीवति कुण्डःस्यात् मृते भर्त्तरि गोलकः। तौ तु जातौ परक्षेत्रे प्राणिनौ प्रेत्य चेह च। दत्तानि हव्यकव्यानि नाशयेते प्रदायिनाम्" मनुः। "ब्राह्मणा एव संपूज्या पुण्यं स्वर्गमभीप्सता। श्राद्धकाले तु यत्नेन भोक्तव्याह्यजुगुप्सता। दुर्व्वचाः कुनखी कुष्ठी मायावी कुण्डगोलकौ। वर्ज्जनीयाः प्रयत्नेन काण्डपृष्ठाश्च देहिनः" भा० व० १९९अ०। "द्विजात् द्विजातिभार्य्यायां सवर्णायामुत्पन्नकुण्डगोलकयोः संस्कारार्हता यथाह "प्रयोगपारिजाते ब्राह्मे "ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मणः स इति श्रुतिः। तस्माच्च षण्डबधिरकुब्जवामनपङ्गुषु। जडगद्गदरोगार्त्तशुष्काङ्गविकलाङ्गिषु। मत्तोन्मत्तेषु मूकेषु शयनस्थे निरिन्द्रिये। ध्वस्तपुंस्त्वेषु चैतेषु संस्काराः स्युर्यथोचितम्। मत्तोन्मत्तौ न संस्कार्य्याविति केचित् प्रचक्षते। कर्म्मस्वनधिकाराच्च पातित्यं नास्ति चैतयोः। तदपत्यञ्च संस्कार्य्यमपरे प्राहुरन्यथा। संस्कारमन्त्रहोमादीन् करोत्याचार्य्य एव तु। उपनेयांश्च विधिवदाचार्य्यस्य समीपतः। आनीयाग्निसमीपं वा सावित्रीं स्पृश्य वाचयेत्। कन्यास्वीकरणादन्यत् सर्वं विप्रेण कारयेत्। एवमेव द्विजैर्जातौ संस्कार्य्यौ कुण्डगोलकौ" अतस्तस्य ब्राह्मणत्वेऽपि श्राद्धेऽन्नदाननिषेध इति विशेषः। अत्रेदं बोध्यम्। "अशुल्कोपहृतायां तु पिण्डदा वोढुरेव ते" स्मृत्युक्तेः शुल्कदानं विना उपगतपरस्त्रियां जातस्य वोढुरेव पुत्रत्वं शुल्कदाने तु उत्पादयितुरेवेति। अतएव "यन्मे माता प्रलुलोभ रेतः" इत्यादि श्रुत्या क्षेत्रिणएव पिण्डदत्वं भङ्ग्योक्तम्। अस्य प्रस्थेन सह समासे आद्युदात्तता। तेन निर्वृत्ताद्यर्थे चतुरर्थ्यां अश्मा० र। कुण्डर तन्निर्वृत्तादौ त्रि० कुडि—दाहे भावे अ। ६दाहे स्त्री।

**कुण्डक** पु० धृतराष्ट्रपुत्रभेदे। "कुण्डकश्चित्रसेनश्च सुवर्च्चाः कनकध्वजः" भा०आ०१८६अ०, कुण्ड+स्वार्थे क। २कुण्डार्थे,

**कुण्डकीट** पु० कुण्डे योनिकुण्डे कीटइव विचारशून्यत्वात्। १पतितब्राह्मणपुत्रे २जारजातब्राह्मणपुत्रे ३दासीकामुके ४चार्व्वाकवचनाभिज्ञे पुरुषे च मेदि०।

**कुण्डगोलक** न० कुण्डे गोलं गोलाकारं कं जलमत्र। १काञ्जिके हेमच०। स०द्वन्द्वः। २कुण्डगोलकयोः समाहारे च।

**कुण्डङ्ग** पु० कुण्डं तदाकारं गच्छति गम—बा०ख डिच्च। निकुञ्जिकावृक्षे हेम० तस्य लतादिनाऽपिधानेन कुण्डाकारत्वात्तथात्वम् [च शताधिका" भा० आ० ६७अ०।

**कुण्डज** पु० धृतराष्ट्रपुत्रभेदे "कुण्डजश्चित्रकश्चैव दुःशला

**कुण्डजठर** पु० कुण्डइव जठरमस्य। १कुण्डाकारोदरे २ऋ-